# राष्ट्रियशिक्षानीतौ प्रतिबिम्बितम् औपनिषदिकं शिक्षादर्शनम्

डॉ. कल्पना आर्या

**शोधसारः–**

विश्वस्मिन्विश्वे वैदिकवाङ्मयं प्राचीनतमसाहित्यमस्तीति सर्वैरपि विद्वद्भिः सहर्षमङ्गीक्रियते। वैदिकसाहित्यमिदम् अत्यन्तविस्तृतं सुसङ्घटितञ्च वर्तते, यच्च संहिता-ब्राह्मण-आरण्यक-उपनिषत्सु चतुर्षु भागेषु विभक्तम्। वैदिकवाङ्मयस्य विकासक्रमे आरण्यकानामनन्तरमुपनिषदां स्थानमस्ति। उपनिषत्शब्देन तात्पर्यं **'समेषाम् अर्थोत्पादकानां सांसारिकक्रियाकलापानां विमोहकर्त्री विद्या'** इति। उपनिषत्सु गुरुशिष्ययो: संवादरूपेण आत्मा-ब्रह्म-जगत्-इत्यादिगूढविषयाणां सरलतापूर्वकं प्रतिपादनमस्ति। भारतीयसंस्कृते: मान्यतानुसारं शिक्षा मुक्तिदात्री भवति – **'सा विद्या या विमुक्तये'**। शिक्षाव्यवस्था संस्कृतिसमाजयोः विकासाय आधारभूता भवति। यस्या: दयनीयस्थित्या भारतशासनेन नूतनशिक्षानीतेः आवश्यकता अनुभूता। एतदर्थमेव ख्रीष्टस्य २०२० तमवर्षे नूतनराष्ट्रियशिक्षानीतिः (NEP-2020) निर्मिता। इयं भारतीयसंस्कृतेः महनीयतत्त्वैस्सह अर्वाचीनवैज्ञानिकदृष्टिकोणैः समन्विता अस्ति। एतस्यामुपनिषदाम् उदात्तविचाराणां प्रतिष्ठापनार्थं कीदृश: प्रयास: विहित: ? इति शोधपत्रेऽस्मिन् परिशीलनीयमस्ति।

राष्ट्रियशिक्षानीतौ विद्यालयी शिक्षा, उच्चतर-शिक्षा, अन्याः केन्द्रीयविचारणीयाः बिन्दवः, क्रियान्वयनस्य रणनीतिश्चैते चत्वारः भागाः सप्तविंशति-अध्यायाश्च सन्ति। अत्र भारतीयभाषाभिः स्वकीयज्ञानपरम्पराया: सांस्कृतिकसम्पदश्च ज्ञानं मुख्यं ध्येयमस्ति। राष्ट्रियशिक्षानीतिः उपनिषदां शिक्षादर्शनमुद्दिश्य निर्मिता। यस्य प्रभाव: नूतनशिक्षानीते: आलोके निर्मितायाम् 'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्याया: रूपरेखायाम्[1] अपि दरीदृश्यते। या तैत्तिरीयोपनिषद: "पञ्चकोशविकासः" इत्यनेन सम्बद्धाऽस्ति। व्यक्तित्वनिर्माणप्रक्रियासन्दर्भे एते पञ्चकोशा: अत्यन्तप्रभावशालिन: भवन्ति।[2] राष्ट्रियपाठ्यचर्याया: रूपरेखानुरूपं राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा पञ्चकोशविकासमुद्दिश्य नूतनपाठ्यपुस्तकानां निर्माणमारब्धम्। राष्ट्रियशिक्षानीतौ उपनिषदां तर्कः, प्रश्नः संवादश्च इत्यादिविधीनामनुगुणमधिगमस्य विभिन्नयुक्तय: अनुसृता:। अनेन उपर्युक्तविमर्शेण स्पष्टमस्ति यत्

औपनिषदिकशिक्षादर्शनं भारतीयसंस्कृतौ महनीयं रत्नमिव प्रतिभाति। उपनिषदां शिक्षादर्शनस्य पञ्चकोशादितत्त्वानामङ्गीकरणेन राष्ट्रियशिक्षानीतौ अस्य स्पष्टप्रभाव: दरीदृश्यते।

**कूटशब्दाः-** उपनिषद्, भारतीयः, शिक्षानीतिः, संस्कृतिः, राष्ट्रियः वेदः NCERT

**शोधलेखः**–

भारतीयसंस्कृते: मान्यताया अनुसारं शिक्षा मुक्तिदात्री भवति, तदाह – **'सा विद्या या विमुक्तये'**। शिक्षाया: माध्यमेन व्यक्ते: चरित्रस्य निर्माणं भवति। शिक्षयैव मानवीयगुणानां सर्वाङ्गपूर्ण: विकासोऽपि सम्भवति। अतः एव प्रत्येकं समाज: उत्तमशिक्षाव्यवस्थाया: कामनां करोति। शिक्षाव्यवस्था संस्कृतेः समाजस्य च विकासाय आधारभूता भवति। यस्या: दयनीयस्थितेः कारणेन नूतनायाः शिक्षानीतेः आवश्यकता अनुभूता। अपि च जगत: परिवर्तनशीलत्वात् निश्चिते समयान्तराले नवनीतीनां निर्माणम् अपेक्ष्यते। एतदर्थमेव ख्रीष्टस्य २०२० तमे वर्षे भारतशासनेन नूतना राष्ट्रियशिक्षानीतिः (NEP-2020) निर्मिता। इयं भारतस्य प्राचीनसंस्कृतेः महनीयतत्त्वै: सह अर्वाचीनवैज्ञानिकदृष्टिकोणैः समन्विता अस्ति। एतस्यां राष्ट्रियशिक्षानीतौ उपनिषदाम् उदात्तविचाराणां प्रतिष्ठापनस्य कीदृश: प्रयास: विहित:? इत्यत्र अस्मिन् शोधपत्रे परिशीलनीयम् अस्ति।

विश्वस्मिन्विश्वे वैदिकवाङ्मयं प्राचीनतमं साहित्यम् अस्तीति सर्वैरपि विद्वद्भिः सहर्षम् अङ्गीक्रियते। भारतीयसंस्कृतौ वैदिकवाङ्मयस्य व्यापक: प्रभाव: महत्त्वपूर्णं स्थानं च वर्तते। मानवजातेः प्राचीनतमः इतिहासः, सामाजिकनियमः, सदाचारः, दर्शनम्, कला, संस्कृतिः धर्मश्च इत्यादीनाम् आधारः वेद एव भवति। वेदानां महनीयगौरवस्य वर्णनं कुर्वता भगवता मनुना निगदितं यत् –

**"वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनाम् आत्मनस्तुष्टिरेव च ॥**
**'यः कश्चित् कस्यचिद् धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः' ॥**[3]

वैदिकवाङ्मयं भारतीयसंस्कृतेः, आध्यात्मिकजीवनस्य सांस्कृतिकविकासस्य च ज्ञानाय कोशग्रन्थ इव प्रमाणस्वरूपं वर्तते। साहित्यमिदं सहस्राब्दिभिः प्रचलितमस्ति। भारतीयसंस्कृते: परिपूर्णं ज्ञानमस्य समुचितं रसास्वादं विना नैव सम्भवति। वैदिकं साहित्यमिदम् अत्यन्तं विस्तृतं सुसङ्घटितञ्च वर्तते, यच्च संहिता, ब्राह्मणम्, आरण्यकम् उपनिषत् चैतेषु चतुर्षु भागेषु

विभक्तमस्ति। एतेषु वेदशब्देन मुख्यतया मन्त्ररूपेण संहिताभागस्य ग्रहणं भवति; ब्राह्मणानि आरण्यकानि उपनिषदश्च वेदमन्त्राणां भाष्यं व्याख्या वा भवन्ति।

वैदिकवाङ्मयस्य विकासक्रमे आरण्यकानां पश्चात् उपनिषदां स्थानं भवति। वैदिकसाहित्यस्य अन्तिमभागत्वेन उपनिषद्ग्रन्थाः 'वेदान्त:' इत्यनया संज्ञया अपि व्यवह्रियन्ते। उपनिषत्सु आत्मज्ञानम्, मोक्षज्ञानम्, ब्रह्मज्ञानञ्च इत्यादितत्त्वानां प्राधान्यं भवति। अत एव उपनिषद: आत्मविद्या, मोक्षविद्या ब्रह्मविद्या चेति नाम्नाऽपि ज्ञायन्ते। उपनिषत्शब्देन तात्पर्यं **'समेषाम् अर्थोत्पादकानां सांसारिकक्रियाकलापानां विमोहकर्त्री विद्या'** इति वर्तते। उपनिषदाम् अध्ययनेन ऐहिकविषयेषु वैराग्यं जायते, तस्मात् संसारस्य बीजभूता विद्या विनष्टा भवति। अत: जीवः अविद्यायाः बन्धनाद्विमुच्य ब्रह्मज्ञानस्य प्राप्तावपि समर्थः भवति।

उपनिषत्साहित्यम् आध्यात्मिकज्ञानस्य स्रोतांसि भवन्ति। उपनिषत्सु गुरुशिष्ययो: संवादरूपेण आत्मा, ब्रह्म, जगत् इत्यादीनां गूढविषयाणां सरलतापूर्वकं प्रतिपादनं जातम्। उपनिषदां संख्या शताधिकं मन्यते। वेदस्य शाखानां ब्राह्मणानाम् आरण्यकानां च सदृशमेव कालचक्रे अधिकांशोपनिषदः लुप्तप्रायताम् अवाप्नुवन्। मुक्तिकोपनिषदि दशोपनिषद: समुल्लिखिता: वर्तन्ते। तद्यथा –

**'ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश'**॥ इति।

उपनिषदः अध्यात्मविद्याया: दर्शनस्य च अद्वितीया: ग्रन्था: सन्ति। औपनिषदिके शिक्षादर्शने ब्रह्म, जीव:, जगत्, अध्यात्मश्च इत्येतेषां विषये चिन्तनं भवति। उपनिषदां माहात्म्यम् इदं वर्तते यत् तेषाम् उत्तरवर्तिग्रन्थेषु अध्यात्मदर्शनस्य प्रभावो दृश्यते। न केवलं पुरातनकाले एव प्रत्युत 'साम्प्रतम् अपि न कोऽपि एतादृश: जन: स्यात्, यस्य हृदये उपनिषदां विशुद्धानां प्रश्नानां पवित्राणां विचाराणां च अध्ययनेन नूतनानां भावानाम् उदयानुभूति: न भवेत्, य: स्वस्य चक्षुषां समक्षं नवप्रकाशं न पश्येत्'। यद्यपि उपनिषद: ज्ञानकाण्डरूपेण अध्यात्मविद्याया: प्रतिपादनं कुर्वन्ति, तथापि साधारणमनुष्यै: स्वकीयजीवने कथं कर्म कर्तव्यम् ? इत्यस्य उल्लेखनम् अपि उपनिषत्सु प्राप्यते।

वेदोपनिषत्कालीना भारतीया ज्ञानपरम्परा कालातिवर्तिनी वर्तते। या हि वैदिककालात्परं बौद्धकाले, जैनकाले तदुत्तरवर्तिकाले चापि सततं प्रचल्यमाना आसीत्। समृद्धा भारतीया ज्ञानपरम्परेयं मुगलानाम् आङ्ग्लानां च शासनै: ह्रासत्वम् उपागता। एतस्या: पुनरुज्जीवनाय

अस्माकं शिक्षाव्यवस्थायां नीतिगतं परिवर्तनम् अपेक्षितं भवति। अत एव स्वातन्त्र्योत्तरकाले ख्रीष्टस्य 1948, 1952, 1964, 1968, 1986, 1992 वर्षेषु भारतीयशासनेन विभिन्नसमितय: संघटिता:। याभि: शिक्षाव्यवस्थाया: तत्सम्बद्धनीतीनां निर्धारणस्य च कार्यं विहितम्। किन्तु स्वतन्त्रतायाः प्राप्तेरनन्तरं वाममार्गिविचारै: प्रभावितजना: भारतीयशासनस्य उच्चपदेषु समारूढा:। अपि च शीर्षनीतिनिर्माणस्य संस्थासमित्यादिषु तेषाम् एकाधिकार: अभवत्। तस्मात् अस्माकं सनातनसंस्कृतिं तद्विशालवैदिकज्ञाननिधिं च प्रति पूर्वाग्रहपूर्ण: व्यवहार: जात:। परिणामत: भारतस्य शिक्षाव्यवस्थाया: स्वरूपम् एव परिवर्तितं जातम्। यस्या: ज्ञानपरम्पराया: प्रचार: प्रसार: सम्मानं च करणीयम् आसीत्; तां प्रति अज्ञानम्, अनभिरुचि: दुराग्रहश्च स्यात् इत्यस्य कुटिल: प्रयास: जात:। एतेषां दुर्गुणानाम् उपशमनार्थमेव भारतशासनेन भारतस्य प्राचीनज्ञानपरम्पराया: अनुगुणं राष्ट्रियशिक्षानीते: निर्माणं कृतम्।

राष्ट्रियशिक्षानीतौ निम्नोक्ताः चत्वारः भागाः सन्ति – विद्यालयी शिक्षा, उच्चतर-शिक्षा, अन्याः केन्द्रीयविचारणीयाः बिन्दवः, क्रियान्वयनस्य रणनीतिः चेति। ये हि सप्तविंशति-अध्यायेषु अन्तर्विभक्ता: सन्ति। विकसितभारतस्य संकल्पानुसारं 'शिक्षानीतिरियं ख्रीष्टस्य 2040 तमवर्षपर्यन्तं भारतस्य अद्वितीयशिक्षाप्रणालीं निर्मातुं सफला भविष्यती'[4]त्यत्र एषा कामना विहिता।

अस्यां नवनिर्मितायां राष्ट्रियशिक्षानीतौ बहुविषयी शिक्षा, सर्वाङ्गीण: विकास:, मानवात् मानवतां प्रति, जडत: जगत्पर्यन्तञ्च इत्येते विचारा: समाविष्टा: वर्तन्ते। राष्ट्रियशिक्षानीतौ भारतीयभाषाणां माध्यमेन स्वस्य ज्ञानपरम्पराया: तथा च सांस्कृतिकसम्पद: विषयकम् अवगमनं स्यात् इति ध्येयं वर्तते। यत्र भारतीयभाषा: प्रारम्भिकशिक्षया सह योजिता: सन्ति। अनेन दुर्गमक्षेत्रस्थानां जनानां जीवने धनात्मक: प्रभाव: स्यात्, तद्यथा- यदि आदिवासिक्षेत्रस्थजनानां सन्ततिः स्वकीयानां स्थानीयभाषोपभाषाणां माध्यमेन पठितुमिच्छति चेत् स: सरलतापूर्वकम् अधिगन्तुम् अवसरान् लभेत।

पूर्ववर्तिनीभि: शिक्षानीतिभि: छात्राणां ज्ञानं केवलं जीविकोपार्जनं पर्यन्तमेव सीमितम् आसीत्। तस्मात् कारणात् अवसराणाम् अभावेन निरुद्योगिताया: समस्या प्रवर्धिता जाता। एतादृशीनां समस्यानां समाधानाय नूतनशिक्षानीतौ भारतस्य प्राचीनज्ञानपरम्पराया: विशिष्टं स्थानं कल्पितम्। यस्मिन् योगायुर्वेदाद्या: पारम्परिकनिधय: कौशलाधारिता शिक्षा च पाठ्यक्रमे समाविष्टा: सन्ति। अपि च अस्मिन् क्षेत्रे नूतनानाम् अनुसन्धानकार्याणां माध्यमेन समग्रमानवविकासस्य संकल्पना विकसिता भवेत्।

साम्प्रतिकशिक्षाव्यवस्थाया: नीतिनिर्मातृभिः उपनिषदां शिक्षादर्शनस्य प्रमुखतत्त्वानि उद्दिश्य नूतनशिक्षानीति: निर्मिता। येषां प्रभाव: नूतनशिक्षानीते: आलोके निर्मितायाम् 'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्याया: रूपरेखा - २०२३' (NCF-FS)[5] इत्यस्यामपि दरीदृश्यते। राष्ट्रियशिक्षाया: नवनीतावस्याम् औपनिषदिकशिक्षादर्शनस्य महत्त्वपूर्णानां तत्त्वानां विनिवेश: सिद्धान्तरूपेण एव न कृत:, प्रत्युत तस्य व्यावहारिकप्रयोगाय अपि प्रयत्नानि प्रारब्धानि। एतदर्थं राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदा (NCERT)[6] राष्ट्रियपाठ्यचर्याया: रूपरेखानुरूपं नूतनपाठ्यपुस्तकानां निर्माणकार्यमपि सम्पादितम्। यस्मिन् औपनिषदिकशिक्षादर्शनस्य प्रतिबिम्ब: पूर्णतया परिलक्षितो भवति।

'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्याया: रूपरेखा' मुख्यत: तैत्तिरीयोपनिषदि आधारिता वर्तते। या हि तैत्तिरीयोपनिषद: "पञ्चकोशविकासः" इत्यस्य आधारभूतावधारणया सम्बद्धा वर्तते। ते च पञ्चकोशा: भवन्ति - अन्नमयकोश:, प्राणमयकोश:, मनोमयकोश:, विज्ञानमयकोश: आनन्दमयकोश: चेति। तैत्तिरीयोपनिषदि ब्रह्मवल्ल्याम्[7] एतेषां पञ्चकोशानां वर्णनमित्थं विहितम्-

१. **अन्नमयकोश:** - “स वा एष पुरुषोऽन्नरसमयः तस्येदमेव शिरोऽयं दक्षिण: पक्षः, अयमुत्तरः पक्षः, अयमात्मा, इदं पुच्छं प्रतिष्ठा”।

२. **प्राणमयकोश:** - “तस्माद् वा एतस्मादन्नरसमयात् अन्योऽन्तर आत्मा प्राणमयः। तेनैष पूर्णः। स वा पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य प्राण एव शिरः। व्यानो दक्षिण: पक्षः। अपानमुत्तरः पक्षः। आकाश आत्मा। पृथिवी पुच्छं प्रतिष्ठा”।

३. **मनोमयकोश:** - “तस्माद्वा एतस्मात् प्राणमयात् अन्योऽन्तर आत्मा मनोमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य यजुरेव शिरः। ऋग्दक्षिणः पक्षः। सामोत्तरः पक्षः। आदेश आत्मा। अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा”।

४. **विज्ञानमयकोश**: - “तस्माद् वा एतस्मान्मनोमयात्, अन्योऽन्तर आत्मा विज्ञानमयः। तेनैष पूर्णः। स वा एष पुरुषविध एव। तस्य पुरुषविधताम्। अन्वयं पुरुषविधः। तस्य श्रद्धैव शिरः। ऋतं दक्षिणः पक्षः। सत्यमुत्तरः पक्षः। योग आत्मा। महः पुच्छं प्रतिष्ठा”।

५. **आनदमयकोश**: - “तस्माद्वा एतस्माद् विज्ञानमयात्, अन्योऽन्तर आत्मा आनन्दमयः। तेनैष पूर्णः, स वा एष पुरुषविध एव, तस्य पुरुषविधताम्, अन्वयं पुरुषविधः। तस्य प्रियमेव शिरः, मोदो दक्षिणः पक्षः, प्रमोद उत्तर पक्षः, आनन्द आत्मा, ब्रह्म पुच्छं प्रतिष्ठा”। इति।

'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्यायाः रूपरेखा - २०२३' औपनिषदिकदर्शनस्य पञ्चकोशम् अधिगमस्य पञ्च आयामैः साकं योजयति। एते पञ्च आयामाः अधोलिखिताः सन्ति- शरीर-गत्यात्मकः, समाज-संवेगात्मकः, भाषा-साक्षरता, संस्कृतिः तथा च समाजबोधः। पञ्चकोशविकासस्य प्रक्रियायां मानवस्य व्यक्तित्वस्य पञ्चविधानां कोशविशिष्टानां विकासः निहितः भवति। मानवजीवने व्यक्तित्वनिर्माणस्य प्रक्रियायाः सन्दर्भे एते पञ्चकोशाः अत्यन्तं प्रभावशालिनः भवन्ति।

'आधारभूतस्तरस्य राष्ट्रियपाठ्यचर्यायाः रूपरेखा'याः निर्देशानाम् अनुगुणं निर्मितेषु पाठ्य-पुस्तकेषु सम्प्रति प्रथम-द्वितीय कक्षयोः एव पुस्तकानां निर्माणं जातम्। अवशिष्टानां तृतीयाकक्षातः द्वादशीकक्षायाः पाठ्य-पुस्तकानि अग्रिमे शैक्षणिकसत्रे उपलब्धानि भविष्यन्ति इति परिषदः अधिकारिभिः सूच्यते।[8] पञ्चकोशम् आधृत्य उपर्युक्तकक्षयोः भाषागणितविषययोः पुस्तकानि एव उपलब्धानि सन्ति। येषु एकं पुस्तकं गणितस्य अस्ति। अन्यानि हिन्दीभाषायाः आङ्ग्लभाषायाः उर्दूभाषायाः च पुस्तकानि सन्ति। उभयोः कक्षयोः समेषां पुस्तकानां नामानि समानानि एव सन्ति। गणितस्य पाठ्य-पुस्तकस्य नाम 'आनन्दमय गणित' इति वर्तते। हिन्दीभाषायाः पुस्तकस्य नाम 'सारंगी' इति अस्ति। आङ्ग्लभाषायाः पुस्तकस्य नाम 'मृदङ्ग' तथा च उर्दूभाषायाः पुस्तकस्य नाम 'शहनाई' इति वर्तते। राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणयोर्परिषदः अनुसारम् एतानि पुस्तकानि दक्षताधारितां सामग्रीं सरलां रुचिपूर्णां च विधास्यन्ति।

शिक्षानीतिविषये राष्ट्रियस्तरस्य विचारविमर्शात्परं राज्यानि अपि नवनीतिम् अनुसृत्य भारतीयज्ञानपरम्परां प्रति उन्मुखाः अभवन्। अस्मिन्नेव क्रमे छत्तीसगढ़प्रदेशस्य राज्य-शैक्षिक-अनुसन्धान-प्रशिक्षणयोर्परिषदा (SCERT-CG) अपि उपनिषदां शिक्षादर्शनस्य अनुसरणं कृतम्। तत्रापि तैत्तिरीयोपनिषदः पञ्चकोशात् प्रेरणाम् अवाप्य नूतनानां पाठ्य-पुस्तकानां निर्माणं कृतम्। छत्तीसगढ़शासनस्य शिक्षाविभागस्य अनुसारम् एतेषां पुस्तकानां रचनायां "जादुई पिटारा' इत्यस्य अवधारणा समाहिता अस्ति। अत्र पाठ्यचर्यायाः लक्ष्येण सह पञ्चकोशानां समावेशनस्य कार्यमपि विहितम्। येन छात्राणां जीवनस्य शारीरिकं सामाजिकं भावनात्मकं नैतिकञ्च उन्नयनं भवेत्।

उपनिषदां तर्कः, प्रश्नः संवादश्च इत्यादीनां विधीनाम् अनुगुणम् अधिगमस्य विभिन्नाः युक्तयः अनुसृताः सन्ति। एतेषाम् अतिरिक्तम् अत्र तादृशीनां विषयसामग्रीणां गतिविधीनां च प्राचुर्यम् अपि वर्तते, याः छात्रेषु पर्यावरणं प्रति संवेदनशीलतायाः भावनायाः विकासे अत्यन्तं सहायिकाः भवन्ति।

भारतीयसंस्कृतिः विविधताभि: सम्पन्ना अस्ति। असंख्यका: भाषोपभाषा: शास्त्रीयं नृत्यं सङ्गीतं पारम्परिकलोककलाश्च इमां सांस्कृतिकरूपेण समृद्धां कुर्वन्ति। स्वादिष्टानि व्यञ्जनानि उत्तमवस्त्राभरणादीनि च जीवनस्य प्रत्येकस्मिन् क्षेत्रे भारतीयसंस्कृते: वैविध्यस्य प्रमाणभूतानि सन्ति। एतानि बहुमूल्यानि सांस्कृतिकतत्त्वानि अस्माकं न्यासभूतानि सन्ति। यानि भाविसन्ततिभ्य: अवश्यमेव संरक्षणीयानि। शिक्षाप्रणाल्यां व्यावहारिकप्रयोगेण एतेषां पोषणाय प्रयत्नानि विधातव्यानि। अस्माकं वैदिकसंस्कृतेः समृद्धं रूपम् उपनिषत्सु एव अवलोक्यते। उपनिषदां अध्यात्मदर्शनयोः ज्ञानेन एव तात्कालिकशिक्षाव्यवस्थायाः अभिज्ञानं भवितुं शक्यते। उपनिषत्कालिकसाहित्ये वैज्ञानिकं दार्शनिकं धार्मिकं चिन्तनं द्रष्टुं शक्यते। वर्तमानमिव तस्मिन् समये अपि जीवनस्य लक्ष्याणां पूर्तये शिक्षा महत्साधनत्वेन मन्यते स्म। राष्ट्रियशिक्षानीतौ अपि उक्तमस्ति यत् - **मानवस्य लक्ष्याणां निर्धारणं तात्कालिकानाम् आवश्यकतानाम् आदर्शानाञ्च आधारेण भवति**।

राष्ट्रियपाठ्यचर्यायाः रूपरेखायाः[9] अनुसारं **'भारतस्य शिक्षाया: इतिहासस्य समालोचनेन ज्ञायते यत् प्राचीनभारते शिक्षाया: मुख्यम् उद्देश्यं ज्ञानप्राप्ति: आसीत्'**। औपनिषदिकशिक्षायां ज्ञानं सर्वोच्च-उपलब्धि: मन्यते स्म, यतोहि शिक्षाया: मुख्यम् उद्देश्यम् आध्यात्मिकचेतनाया: विकास:, चरित्रस्य निर्माणम्, मनस: उच्चतमाम् अवस्थां यावत् नैतिकम् उत्थानञ्च आसीत्। तथा चैतस्य उद्देश्यं मानवीय-शिष्टाचारस्य अनुसारं व्यवहार: आसीत्। अत:एव कठोपनिषदि मानवमात्रस्य कृते निम्नोक्तम् आह्वानं कृतम् -

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**
**क्षुरस्य धारा निहिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति।।**[10]

तैत्तिरीयोपनिषदि आरम्भे एव उल्लिखितम् अधोलिखितं प्रार्थनामन्त्रम् औपनिषदिकशिक्षादर्शनस्य महनीयं स्वरूपम् उपस्थापयति। यस्मिन् गुरु: शिष्यश्च सम्भूय उपविश्य प्रार्थयन्ति यत् -

**"ॐ सह नाववतु, सह नौ भुनक्तु, सह वीर्यं करवावहै।**
**तेजस्वि नावधीतमस्तु, मा विद्विषावहै"।।**[11]

इममेव भावम् अङ्गीकृत्य राष्ट्रियशिक्षानीतौ (२०२०) शिक्षकस्य छात्राणां च अन्तस्सम्बन्धस्य संकल्पना विहिता अस्ति। तदुक्तम् - **अस्माकं छात्राणां राष्ट्रस्य च सर्वोत्तमसम्भवभविष्यस्य निर्माणार्थं शिक्षकाणां सशक्तीकरणस्य आवश्यकता अस्ति**।[12]

ऋग्वेदे उक्तमस्ति यत् **"आ नो भद्रा: क्रतवो यन्तु विश्वतः दब्धासो अपरीतासः..."** अर्थात् प्रत्येकं दिशातः आगच्छन्तः, सात्विकाः विचाराः स्वीकर्तव्याः, न केनापि वस्तुना वंचितो भव, सुवचनानि ग्रहीतव्यानि तदैव कल्याणं स्यात्। आधुनिकपरिदृश्ये भारतस्य उपनिषदादिग्रन्थेषु वर्णिताया: प्राचीनज्ञानपरम्पराया: आवश्यकता समस्तमपि विश्वम् अनुभवति। अत एव अस्मिन् विषये अस्माभिः विचारपूर्णं मन्थनं विधातव्यम्। उपनिषदां शिक्षादर्शनस्य अनुसारं मानवेन विद्यया मोक्षप्राप्तिः कर्तव्या। तदुक्तम् -

**'विद्यां चाविद्यां च यस्तद्वेदोभयं सह।**
**अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते' ॥**[13]

राष्ट्रियशिक्षानीतौ (२०२०) अपि प्राचीनभारतीयज्ञानपरम्परायां शिक्षाया: लक्ष्यं निम्नोक्तरूपेण समुल्लखितम् अस्ति यत् - **"ज्ञान, परम्परा और सत्य की खोज को भारतीय विचार परम्परा और दर्शन में सर्वदा सर्वोच्च मानवीय लक्ष्य माना जाता था।"**[14]

**निष्कर्षः**

इत्थम् उपर्युक्तविमर्शेण इदं स्पष्टम् अस्ति यत् औपनिषदिकं शिक्षादर्शनं भारतीयसंस्कृतौ महनीयं रत्नमिव प्रतिभाति। उपनिषदः पञ्चकोशानाम् अङ्गीकरणेन राष्ट्रियशिक्षानीतौ अस्य स्पष्ट: प्रभाव: अपि दरीदृश्यते। छात्राणां समक्षम् औपनिषदिकशिक्षायाः अनुगुणं वातावरणम् उपस्थापयितुम् एष: एकः अभिनव: प्रयास: अस्ति। यश्च अवश्यमेव छात्रेभ्य: आनन्दस्य अनुभूतिं कारयेत्। पञ्चकोशम् आधृत्य निर्मितानि एतानि नूतनानि पाठ्य-पुस्तकानि कक्षायां पठने नितान्तमेव सहायकानि भविष्यन्ति। अनेन सहैव परिवारे समुदाये वा सार्थकै: अधिगमसंसाधनै: सह अधिगमस्य महत्त्वं वर्धयन्ति। अपि च छात्राणां व्यावहारिकजीवनेन सह संयोजनस्य प्रयत्नं विधास्यन्ति इति।

---

1 National curriculum framework: Foundation Stage - 2023 by NCERT.
2 National Council for Educational Research and Training, New Delhi.
3 मनुस्मृतिः, 2.6.7.
4 राष्ट्रियशिक्षानीतिः(2020), परिचयः, पृ.सं. 4.
5 National curriculum framework: Foundation Stage - 2023 by NCERT.
6 National Council for Educational Research and Training, New Delhi.
7 तै.उ., ब्र.व. अनु. १-५
8 जनसत्ता, ६ जुलाई २०२३
9 एनसीएफ़-एफ़एस 2023

[10] कठोपनिषदि 1.3.14.
[11] तैत्तिरीयोपनिषदि, 2.2.2
[12] राष्ट्रिय शिक्षा नीति (2020) पृ.सं. 31.

[13] ईशोपनिषद्, 11
[14] राष्ट्रिय शिक्षा नीति (2020), परिचय, पृ.सं. 4.

*****